# 'बौद्धन्यायानुसारं प्रमेयानां वैशिष्ट्यम्'

डॉ. कृष्णा कुमारी
सहायक आचार्य, केन्द्रीय संस्कृत विश्वविद्यालय
लखनऊ-परिसर, लखनऊ
Email: krishnaboris12@gmail.com

सर्वेषामपि बुद्धोपदेशानां द्विविधं लक्ष्यम्। एकतस्ते समारोपापवादविनिर्मुक्तं शान्तं शिवं वस्तुतत्त्वं निर्दिशन्ति, अपरतश्च मानवानां जीवने जगति च विद्यमानानां विविधानां दुःखफलानां समस्यानां यन्मूलं वस्तुस्वरूपाज्ञानं तन्निराकरणे तेषां प्रयासः। भगवता बुद्धेन सर्वजनहितकारकं यद्धि तत्त्वज्ञानमाविष्कृतम्, तत् सर्वजनसामान्यं विधातुं तदनुयायिषु भिक्षुषु महान् उत्साहः, बलवती च प्रेरणा आसीत्। एषा लक्ष्यप्राप्तिः हेतुविद्यासमाश्रयेणैव सुशका। फलतश्च बौद्धेषु तस्या विद्यायाः समधिकं महत्त्वं परिलक्ष्यते। तेषु एतस्य सर्वस्य हेतुविद्याप्रवणस्य समारम्भजातस्य भगवान् बुद्ध एव प्रेरणास्रोतः। तेन भगवता स्वयमेव विरोधिमन्तव्यानि निराकुर्वता समसामयिकास्तैर्थिकाचार्यास्तर्कबहुलेन वादकौशलेन निगृहीताः[१], स्वानुयायिनश्च सम्प्रेरिताः। धर्मचक्रप्रवर्तनसूत्रं च समुपदिशता भगवता आर्याष्टाङ्गिकमार्गे इदम्प्रथमतया सम्यग्दृष्टये यत् स्थानं निर्दिष्टम्, तस्यापि इदमेव स्वारस्यम्। सम्यग्दृष्टिर्हि सम्यग्ज्ञानम्। सम्यग्ज्ञानमेव च बौद्धानां प्रमाणलक्षणमिति।[२] तद् द्विविधं प्रत्यक्षमनुमानञ्चेति।[३]

मानाधीना मेयसिद्धिरिति सर्वतन्त्राभ्युपगमः। यथा न्यायदर्शने उक्तमस्ति यत् किं पुनरनेन प्रमाणेनाऽर्थजातं प्रमातव्यमिति? तदुच्यते-

**आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।**[४] नैयायिकादयः प्रमाणसंख्यानिरधारणे प्रतिनियतार्थव्यवस्थां नानुमन्वते। अतः नैयायिकादयः सम्पलववादिनः, बौदास्तु व्यवस्थावादिनः, यतोहि बौद्धाः मेयाधीना मानसिद्धिरपीति। तथाहि- **मानं द्विविधं मेयद्वैविध्यात्।**[५] प्रमाणमविसंवादादविसंवादश्चार्थादुत्पत्तेरर्थाव्यभिचारतः। प्रत्यक्षानुमानञ्च प्रामाण्यं नान्यतः, शाब्दादित्वादित्यर्थः। ननु शब्दादीनामर्थप्रतिबन्ध एव नास्तीति प्रमेयद्वैविध्यात्। प्रमेयाव्यभिचारतः प्रामाण्यम्। न च प्रमेयमन्तरेण प्रमेयाव्यभिचारः। प्रमेयञ्च प्रत्यक्षानुमानप्रतिपाद्यादपरं नास्ति। यदाह- न हि स्वसामान्यलक्षणाभ्यामपरं प्रमेयमस्ति। स्वलक्षणविषयं प्रत्यक्षम्।[६] सामान्यलक्षणविषयमनुमानमिति[७] प्रतिपादयिष्यामः। एतदेव प्रतिपादयति- मानं द्विविधमिति।[८] अथ मेय तावद् द्विविधम्। सदृशासदृशत्वात् स्वसामान्यलक्षणञ्च।[९]

**स्वलक्षणम्-** चतुर्विधस्य प्रत्यक्षस्य विषयो बोद्धव्यः स्वलक्षणम्। स्वमासाधारणं लक्षणं तत्त्वं स्वलक्षणम्। यस्य ज्ञानविषयस्य संनिधानादसंनिधानाच्च ज्ञानप्रतिभासस्य ग्राह्याकारस्य भेदः स्फुटत्वास्फुटत्वाभ्याम्। यो हि ज्ञानविषयः संनिहितः सन् स्फुटाभासं ज्ञानस्य करोति, असंनिहितस्तु योग्यदेशस्थ एवास्फुटं करोति, तत् स्वलक्षणम्। सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते, समीपे स्फुटानि। तान्येव स्वलक्षणानि।[१०] य एवार्थः सन्निधानासन्निधानाभ्यां स्फुटमस्फुटं च प्रतिभासं करोति परमार्थसन् स एव।[११] स च प्रत्यक्षस्य विषयो यतः, तस्मात् तदेव स्वलक्षणम्। पुनः कस्मात्तदेव परमार्थसदित्याह- यस्मादर्थक्रियासमर्थं परमार्थसदुच्यते, सन्निधाना-सन्निधानाभ्यां च ज्ञानप्रतिभासस्य भेदकोऽर्थोऽर्थक्रियासमर्थः, तस्मात् स एव परमार्थसन्। तत एव हि प्रत्यक्षविषयादर्थक्रिया प्राप्यते न विकल्पविषयात्। अत एव यद्यपि विकल्पविषयो दृश्य इवावसीयते तथापि न स दृश्य एव ततोऽर्थक्रियाया अभावात्, दृश्याच्च भावात्। अतस्तदेव स्वलक्षणं न विकल्पविषयः।[१२]

**सामान्यलक्षणम्-** अनुमानस्य विषयः बोद्धव्यः सामान्यलक्षणम्। स्वलक्षणाद् यद् अन्यत् तत् सामान्यलक्षणम्, विकल्पज्ञानेनावसीयमानो ह्यर्थः सन्निधाना-सन्निधानाभ्यां ज्ञानप्रतिभासं न भिनत्ति। तथाहि आरोप्यमाणो


©Indira Gandhi National Open University

वह्निरारोपादस्ति। आरोपाच्च दूरस्थो निकटस्थश्च। तस्य समारोपितस्य सन्निधानासन्निधानाच्च ज्ञानप्रतिभासस्य न भेदः स्फुटत्वेनास्फुटत्वेन वा। ततः स्वलक्षणादन्य उच्यते।[१३] सामान्येन लक्षणं सामान्यलक्षणम्।

स्वसामान्यलक्षणाभ्यां व्यतिरिक्तो नास्ति कश्चन तृतीयः पदार्थराशिः। नास्ति च स्व-सामान्योभयात्मकः कश्चन पदार्थः, परस्परविरुद्धयोरैकात्म्यायोगात्। फलतः प्रमेयद्वैविध्यात् प्रत्यक्षमनुमानञ्च प्रमाणं द्विविधम्।

**प्रत्यक्षम्- तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्।**[१४] पूर्वोपरमनुसन्धाय शब्दसङ्कीर्णाकारा प्रतीतिर्जल्पकारा वा कल्पना। यथा विज्ञपुरुषस्य सोऽयं घट इति प्रतीतिः। बालमूकतिर्यगादीनामन्तजल्पाकारा परामर्शरूपा वा प्रतीतिः। तथा चोक्तम्- **अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना।**[१५] तत्र काचित् प्रतीतिरभिलापसंसृष्टाभासा भवति। यथा व्युत्पन्नसङ्केतस्य घटार्थकल्पना घटशब्दसंसृष्टार्थावभासा भवति। काचित्त्वभिलापेनासंसृष्टापि अभिलापसंसर्गयोग्याभासा भवति। यथा बालकस्याव्युत्पन्नसङ्केतस्य कल्पना। तत्र 'अभिलापसंसृष्टाभासा कल्पना' इत्युक्तावव्युत्पन्नसङ्केतस्य कल्पना न संगृह्येत। योग्यग्रहणे तु सापि संगृह्यते। यद्यपि अभिलापसंसृष्टाभासा तु भवत्येव। या चाभिलापसंसृष्टा सापि योग्या। तत उभयोरपि योग्यग्रहणेन संग्रहः। तया कल्पनया कल्पनास्वभावेन रहितं शून्यं सज्ज्ञानं यदभ्रान्तं तत् प्रत्यक्षम् इति परेण सम्बन्धः। भ्रान्तमपि ज्ञानं नार्थसाक्षात्कारि। भ्रान्तं ह्यर्थक्रियासमर्थे वस्तुनि विपर्यस्तमुच्यते। अर्थक्रियाक्षमं च वस्तुस्वरूपं देशकालाकारनियतं, तत्कथं विपरीतप्रतिभासिना भ्रान्तेन ज्ञानेन साक्षात्क्रियते। यदाह- **तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्।**[१६] एतेन कामलिनः शुक्ले शंखं पीतप्रतिभासि ज्ञानं, भ्रमादलातादौ चक्रादिनिर्भासि ज्ञानं, गच्छन्त्यां नावि स्थितस्य चलद्वृक्षादिभ्रान्तिज्ञानं गाढमर्मप्रहाररहितस्य ज्वलत्स्तम्भादिप्रतिभासि ज्ञानं च, न प्रत्यक्षमित्युक्तं भवति।

चत्वारः खलु शास्त्रेषु प्रत्यक्षस्य भेदाः, तथाहि- इन्द्रियप्रत्यक्षम्, मानसप्रत्यक्षम्, स्वसंवेदनप्रत्यक्षम्, योगिप्रत्यक्षं चेति।[१७]

**अनुमानम्-** मीयतेऽर्थोऽनेनेति मानम्।[१८] अनेन तावत् साधकतमेन करणेन सारूप्यलक्षणं प्रमाणं मीयते। पश्चान्मानम्। लिङ्गग्रहण-सम्बन्धस्मरणयोः पश्चाद् मानमनुमानम्। अनुमानलक्षणं तावदाचार्यदिङ्नागेन एवं प्रतिपादितम्। यथा-

**'अनुमानं लिङ्गादर्थदर्शनम्।'**[१९]

स्वार्थं परार्थं चेत्यनुमानस्य भेदद्वयम्।[२०] स्वार्थं तावज्ज्ञानात्मकम्। येन स्वयं प्रतिपद्यते परीक्षार्थं तत् स्वार्थानुमानम्। स्वस्मै यत् तत् स्वार्थमिति व्युत्पत्तिः। आचार्यधर्मकीर्तिना एतस्य लक्षणं अनेन कथितम्-

**"तत्र स्वार्थं त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्।"**[२१]

तत्र तयोः स्वार्थपरार्थानुमानयोर्मध्ये, स्वार्थं ज्ञानं किं वैशिष्ट्यम् इत्याह- त्रिरूपाद् इति, त्रीणि रूपाणि यस्य वक्ष्यमाणानि लक्षणानि तत् त्रिरूपम्। लिङ्ग्यते गम्यतेऽनेनाऽर्थ इति लिङ्गम्। तस्मात् त्रिरूपाल्लिङ्गात् यज्जातं ज्ञानम् अथवा त्रिरूपाल्लिङ्गाद् यद् अनुमेयालम्बनं ज्ञानं तत् स्वार्थानुमानम् इति। अनेन रूपत्रययुक्ताल्लिङ्गादनुमेये परोक्षविषये यद् ज्ञानं प्रतिपत्तुरुत्पद्यते, तत् स्वार्थानुमानम्। बौद्धमतानुसारं साधनवाक्यं द्विविधम्। व्याप्तिपक्षधर्मतासंज्ञकञ्च। अयमेव लिङ्गस्य त्रिरूपत्वमुच्यते अनुमेये पर्वतादौ धर्मिणि लिङ्गस्यास्तित्वमेव निश्चितम्, तदेकं रूपं पक्षधर्मतासंज्ञकम्। द्वितीयं रूपं सपक्ष एव सत्त्वं निश्चितम्[२२] अर्थात् सपक्ष एव सत्त्वं निश्चितमित्यन्वयसंज्ञकम्। तृतीयं रूपम् असपक्षे चासत्त्वमेव निश्चितम्[२३] अर्थात् न सपक्षोऽसपक्षः। तत्रासत्त्वमेव निश्चितं व्यतिरेकसंज्ञकम्। त्रिरूपस्य त्रीण्येव लिङ्गानि।[२४] लिङ्गस्यापरनामानि साधनं ज्ञापकं हेतुर्व्याप्यं चेति। त्रीणि लिङ्गानि एतानि सन्ति-

**अनुपलब्धिः स्वभावः कार्यञ्चेति।**[२५]

तदनु परार्थं तावद् वचनात्मकम्। येन परं प्रतिपादयति तत्परार्थमिति। परस्मै यत् तत् परार्थानुमानमिति। अस्य तावल्लक्षणं धर्मकीर्तिना इत्थं प्रतिपादितम्- **"त्रिरूपलिङ्गाख्यानं परार्थमनुमानम्।"**[२६] इति। स्वार्थानुमाने एवानुमानशब्दस्य प्रयोगो मुख्यः। अनुमानोत्पादकत्वात् परार्थस्याप्यनुमानत्वम्, कारणे कार्योपचारात्।[२७]


©Indira Gandhi National Open University

अनेन प्रकारेण स्पष्टं भवति यत् कल्पनापोढस्यैव च ज्ञानस्य प्रत्यक्षत्वाभ्युपगमात्, तेन च लोकस्य संव्यवहाराभावात् लौकिकस्य च प्रमाणप्रमेयव्यवहारस्य व्याख्यातुमिष्टत्वाद् व्यर्थैव प्रत्यक्षप्रमाणकल्पना संजायते। चक्षुर्विज्ञानसमङ्गी नीलं जानाति नो तु नीलमिति चागमस्य प्रत्यक्षलक्षणाभिधानार्थस्याप्रस्तुतत्वात्, पञ्चानामिन्द्रियविज्ञानानां जडत्वप्रतिपादकत्वाच्च नागमादपि कल्पनापोढस्यैव विज्ञानस्य प्रत्यक्षमिति न युक्तमेतत्। तस्माल्लोके यदि लक्ष्यं यदि वा स्वलक्षणं सामान्यलक्षणं वा, सर्वमेव साक्षादुपलभ्यमानत्वादपरोक्षम्, अतः प्रत्यक्षं व्यवस्थाप्यते तद्विषयेण ज्ञानेन सह। द्विचन्द्रादीनां तु अतैमिरिकज्ञानापेक्षया अप्रत्यक्षत्वम्, तैमिरिकाद्यपेक्षया तु प्रत्यक्षत्वमेव।

**परोक्षविषयं तु ज्ञानं साध्याव्यभिचारिलिङ्गोत्पन्नमनुमानम्।**[२८]

तानि च परस्परापेक्षया सिध्यन्ति, सत्सु प्रमाणेषु प्रमेयार्थाः, सत्सु प्रमेयेष्वर्थेषु प्रमाणानि। नो तु खलु स्वभाविकी प्रमाणप्रमेययोः सिद्धिरिति।[२९] प्रमेयसंख्याधीना प्रमाणद्वयसंख्याऽपि सिध्यतीति। तथाहि-

**बद्धोक्तेषु परोक्षेषु जायते यस्य संशयः।**

**इहैव प्रत्ययस्तेन कर्तव्यः शून्यतां प्रति।।**[३०]

कारिकामिमां व्याचक्षाण आचार्यचन्द्रकीर्तिः प्रमेयद्वित्वं प्रतिपादयन्नाह-

**"न हि सर्वे भावाः प्रत्यक्षज्ञानगम्याः, अनुमानगम्या अपि विद्यन्ते"।**[३१]

मानवानां जीवने जगति च विद्यमानानां विविधानां दुःखफलानां समस्यानां यन्मूलं वस्तुस्वरूपाज्ञानं सम्यग्ज्ञानेनैव हेयम्। सम्यग्ज्ञानमेव सर्वदुःखप्रपञ्चोपशमोपायः सर्वविधपुरुषार्थसिद्ध्युपायश्च[३२]।

**सन्दर्भ-संकेत**

---

[१] दीघनिकाय, प्रथमभाग, पोट्ठपादसुत्त, तेविज्जसुत्तं
मज्झिमनिकायपालि, अस्सलायनसुत्तं

[२] आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ-1, सम्पादक- लोसङ् नोरबू शास्त्री, प्रकाशक- के.उ.ति.शि.सं.सारनाथ, वाराणसी, 2004

[३] आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ-4

[४] न्यायदर्शनम्, पृ-21, सम्पादक- स्वामी द्वारिकादासशास्त्री, प्रकाशक- बौद्धभारती, वाराणसी, 1999

[५] प्रमाणवार्तिकम्, 2:1, पृ-409, सम्पादक- स्वामी योगीन्द्रानन्द, प्रकाशक- षड्दर्शनप्रकाशन संस्थान, वाराणसी, 1991

[६] 'तस्य विषयः स्वलक्षणम्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-149, सम्पादक- डॉ. लोब्संग दोर्जे रबलिङ्ग, ठिनले शाशनी, प्रकाशक- के.ति.अ.वि.सारनाथ, वाराणसी, 2010

[७] 'सोऽनुमानस्य विषयः' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-151

[८] वार्तिकालङ्कारभाष्यम्, पृ-410, सम्पादक- स्वामी योगीन्द्रानन्द, प्रकाशक- षड्दर्शनप्रकाशन संस्थान, वाराणसी, 1991

[९] प्रमाणवार्तिकम्, 2:2, पृ-411

[१०] 'यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभास भेदस्तत् स्वलक्षणम्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-149

[११] 'तदेव परमार्थसत्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-150

[१२] 'अर्थक्रियासामार्थ्यलक्षणत्वाद्वस्तुनः' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-150

[१३] 'अन्यत सामान्यलक्षणम्' न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-150

[१४] आचार्यमोक्षकरगुप्तविरचिता तर्कभाषा, पृ-13;


©Indira Gandhi National Open University

न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-142

[१५] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-144

[१६] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-145

[१७] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-146

[१८] आचार्यमोक्षकरगुप्तविरचिता तर्कभाषा, पृ-5

[१९] प्रमाणसमुच्चयः, 1:17

[२०] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-154

[२१] तत्रैव

[२२] आचार्यमोक्षाकरगुप्तविरचिता तर्कभाषा, पृ-28

[२३] तत्रैव

[२४] तत्रैव

[२५] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-158

[२६] न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-154

[२७] तत्रैव

[२८] मध्यमकशास्त्रम्, द्वितीय संस्करणम्, पृ-28, सम्पादक- डॉ श्रीधर त्रिपाठी, प्रकाशक- मिथिलाविद्यापीठ, दरभङ्गा, 1987

[२९] तत्रैव

[३०] चतुःशतकम्, 12:5, उद्धृतोऽयं श्लोकः सोत्रान्तिकदर्शने, पृ-437, ग्रन्थकारः - प्रो. रामशंकर त्रिपाठी, प्रका- के.उ.ति.शि.सं, सारनाथ, वाराणसी, 1990

[३१] तत्रैव

[३२] ‘सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते’ न्यायबिन्दु एवं धर्मोत्तर टीका, पृ-136


©Indira Gandhi National Open University